दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

himsanskritvartah
e-Sanskritnewspaper
नवा प्रेरणा नवोत्साहः

■ पृष्ठ-3 ■ वर्ष-3 ■ अङ्क-329

1

22.09.2024 रविवासरः वि.सं. २०८० आश्विन पञ्चमी आश्विन 7 प्रविष्टांशः

Website- www.himsanskritam.com Email-himsanskrit@gmail.com

## आतिशी दिल्ल्याः मुख्यमन्त्रित्वेन शपथम् अग्रहीत्



आम-आदमी-पार्टिति-दलस्य वरिष्ठनेत्री आतिशी दिल्ल्याः मुख्यमन्त्रित्वेन शपथम् अग्रहीत्। राजनिवासे आयोजिते शपथग्रहणं-समारोहे उपराज्यपालेन विनय कुमार-सक्सेना-इत्यनेन आतिशी तस्याः मन्त्रिपरिषदः सदस्याः च पदगोपनीयतायै प्रतिज्ञापिताः। राष्ट्रपतिना द्रौपदी-मुर्मु-इत्यनाया शपथ ग्रहण-दिवसात् आतिशी दिल्ल्याः मुख्यमन्त्रि-रूपेण नियोजिता।

## माओवादी हिंसायाः पीडितैः सह मेलनं कृतवती राष्ट्रपति द्रौपदीमुर्मुः



राष्ट्रपति पदासीना द्रौपदीमुर्मुः नवदिल्ल्यां राष्ट्रपति भवने छत्तीसगढस्य बस्तर सम्भागस्य माओवादी हिंसायाः पीडितैः सह मेलनं कृतवती। एकस्मिन् सामाजिक संजालीय-सन्देशे राष्ट्रपतिः प्रोक्तवती यत् स्वीय-उद्देश्यानांम पूर्तयेहिंसायाः मार्गं न गन्तव्यं, योहि समाजस्य कृते हानिप्रदः एव। राष्ट्रपति मुर्मु वामदलीयानां अतिवादिनम् आग्रहं कृतवती यत् हिंसायाः निराकरणं कुर्वन्तु, तेषां समास्यानां समाधानाय सर्वकारः सर्वविधप्रयासाः करिष्यति इति।

## प्रथम- क्रिकेट्-निकष-स्पर्धायाः तृतीये दिने अष्ट-पञ्चाशदधिक-शतं धावनाङ्काः अर्जिता

चेन्नई-नगरे एम्.ए. चिदम्बरम्-क्रीडाङ्गणे भारत-बांग्लादेशयोः मध्ये अनुवर्तमानायाः प्रथम- क्रिकेट्-निकष-स्पर्धायाः तृतीये दिने अतिथिदलेन चतुर्णां क्रीडकाणां हानिपूर्वकम् अष्ट- पञ्चाशदधिक-शतं धावनाङ्काः अर्जिता। इतः पूर्वं भारतं चतुर्णां क्रीडकाणां हानिपूर्वकं सप्ताशीत्यधिक-द्विशत-धावनांकान् अर्जित्वा द्वितीयपाल्यै घोषणाम् अकरोत्।

## भारतं ब्राजील् च ऊर्जाक्षेत्रे विद्यमान-सहकार्यस्य समीक्षां कृतवन्तौ



**हिमसंस्कृतवार्ताः।** भारतं ब्राजील् च ऊर्जाक्षेत्रे प्रचलितस्य सहकार्यस्य तथा द्विपक्षीयव्यापारे परस्परं लाभप्रदसम्बन्धानां समीक्षां कृतवन्तौ तथा च स्थायि-इन्धनेषु विशेषतः जैव-इन्धनेषु संलग्नतायाः च समीक्षां कृतवन्तौ। अस्मिन् विषये सूचना पेट्रोलियम-प्राकृतिकगैसमन्त्री हरदीपसिंहपुरी-ब्राजीलस्य खान-ऊर्जा-मन्त्री अलेक्जेण्डर्-सिल्वेरयोः समागमानन्तरं संयुक्तवक्तव्ये प्राप्ता। पुरीमहोदयः गुरुवासरात् आरभ्य ब्राजीलदेशस्य त्रिदिवसीययात्रायां वर्तते। समागमे ब्राजीलदेशे भारतीयकम्पनीनां उपस्थितिवर्धनार्थं सम्भाव्यावकाशानां परिचयं वर्धयितुम् उभयपक्षौ प्रतिबद्धौ स्तः। एतेषु नूतनाः निवेशस्य अवसराः अपि समाविष्टाः भविष्यन्ति। भारतस्य ब्राजीलस्य च व्यापारं वर्धयितुं नवीनमार्गाणां अन्वेषणस्य विषये अपि उभौ नेतारौ चर्चां कृतवन्तौ। वैश्विकजैवईंधनगठबन्धनस्य संस्थापकसदस्यत्वेन उभयपक्षाभ्यां वैश्विकोर्जास्रोतरूपेण जैवईंधनस्य प्रचारार्थं गठबन्धनस्य प्रमुखा भूमिका भविष्यति इति तथ्यस्य उपरि बलं दत्तम्। एतेन न केवलं स्थायिवातावरणं सुनिश्चितं भविष्यति अपितु सामाजिका आर्थिकप्रगतिः अपि भविष्यति। उभौ पक्षौ अङ्गीकृतवन्तौ यत् भारतं ब्राजील् च स्वस्य विद्यमानस्य इथेनॉल-बायोडीजल-उत्पादनस्य आधारभूतसंरचनायाः, वर्धमानस्य विमानन-विपण्यस्य, स्वस्य कृषि-सम्पदां सहितस्य च स्वस्य विशाल-उर्जा-सञ्चय-क्षमतायाः लाभं ग्रहीतुं समर्थौ स्तः, स्थायि-विमाननस्य उत्पादनं, उपयोगे च सहकार्यं कर्तुं च सम्यक् तिष्ठतः। आगामिवर्षस्य फरवरीमासे भविष्माणस्य भारत-ऊर्जा-सप्ताहस्य २०२५ तमस्य वर्षस्य पार्श्वे भारत-ब्राजील-स्वच्छपाक-मन्त्रि-समागमस्य आयोजने अपि उभयदेशाभ्यां ध्यानं प्रदत्तम्। अस्य सम्मेलनस्य उद्देश्यं पाककलायां स्वच्छोर्जायाः उपयोगस्य सहकारिमार्गान् अन्वेष्टुं सामूहिकं अवसरं प्रदातुं वर्तते।

## क्वाड-समूहः हिन्द-प्रशान्त- क्षेत्रे शान्त्यै, प्रगत्यै समृद्ध्यै च कार्यं कर्तुं प्रतिबद्धो वर्तते- प्रधानमन्त्री नरेन्द्रमोदी



प्रधानमन्त्री नरेन्द्रमोदी अमेरिकायाः डेलावेयरे विलमिंगटन नगरे 'क्वाड' नेतृणां षष्ठे वार्षिक-शिखर सम्मेलने सहभागं कर्तुं तत्र सम्प्राप्तवान्। भारतीय-समयानुसारि एतत् सम्मेलनं गतरात्रेः अनन्तरं प्रारप्स्यत्। शिखर सम्मेलनात् प्राक् प्रधानमन्त्री अमेरिका देशस्य राष्ट्रपतिं जो-बाइडेनम् इत्यनेन सह अमिलत्। श्रीमोदी ऑस्ट्रेलिया-देशस्य प्रधानमन्त्रिणा एन्थनी-अलबेनिजेन जापान-प्रधानमन्त्रिणा फुमियो-किशिदा-इत्यनेन च सह उभय-पाक्षिकोपवेशनम् आकारयिष्यति। गतप्रातः अमेरिकायै प्रस्थानात् प्राक् प्रधानमन्त्री प्रावोचत् यत् क्वाड-समूहः हिन्द-प्रशान्त- क्षेत्रे शान्त्यै, प्रगत्यै समृद्ध्यै च कार्यं कर्तुं समान-वैचारिक दृष्टियुतानां देशानां प्रमुख- समूहत्वेन समक्षम् आगतोऽस्ति। अपि च, असौ सम्मेलने स्व-सहयोगिभिः सह सहभागं कर्तुं समुत्सुकोऽस्ति। सः विश्वास प्राकटयत् यत् राष्ट्रपतिना बाइडनेन सह उपवेशनान्तरं भारतामेरिका-देशाभ्यां व्यापक-वैश्विक रणनैतिक-सहभागितां भूयोऽपि दृढयितुम् अवसरः प्राप्स्यते। श्रीमोदी अमेरिकास्थानां प्रमुख समवायानां शीर्षाधिकारिभिः सह अपि परिचर्चां करिष्यति। यात्रायाः अन्तिमे दिवसे प्रधानमन्त्री संयुक्तराष्ट्रमहासभायां 'भविष्यते शिखर-सम्मेलनम्' इत्यभिधानकम् उपवेशनं सम्बोधयिष्यति। अस्य विशिष्ट-शिखर-सम्मेलनस्य विषयः अस्ति-'भद्रतर-भविष्यते बहुपाक्षिकं समाधानम्' इति। शिखर सम्मेलनात् पूर्वं प्रधानमन्त्री भारतीय समुदायं संबोधयिष्यति। विशिष्य छात्रेषु तस्य भाषणम् अभिलक्ष्य सुमहान् उत्साहः वर्तते।

## देशस्य अनेकेषु भागेषु प्रचण्डवृष्टिः भविष्यति-भारतस्य ऋतुविभागः

भारतस्य ऋतुविभागेन, आईएमडी इत्यनेन आगामिदिनेषु देशस्य अनेकेषु भागेषु प्रचण्डवृष्टिः भविष्यति इति पूर्वानुमानं कृतम् अस्ति। अद्यारभ्य मंगलवासरपर्यन्तं ओडिशायां, गुरुवासरपर्यन्तं नागालैण्डे, मणिपुरे, मिजोरमे, त्रिपुरायां च अतिवृष्टिः भविष्यति। अरुणाचलप्रदेशे, असमे, मेघालये च सोमवासरात् गुरुवासरपर्यन्तं प्रचण्डवृष्टिः भवितुं शक्नोति। अस्मिन्नेव समये छत्तीसगढे अपि प्रचण्डवृष्टेः सम्भावना विद्यते, विदर्भ- पूर्वमध्यप्रदेशयोः च मंगलवासरात् गुरुवासरपर्यन्तं प्रचण्डवृष्टिः भवितुं शक्नोति।

## गीतोपदेशः

**अत्र श्रूरा महेष्वासा**
**भीमार्जुनसमा युधि।**
**युयुधानो विराटश्च**
**द्रुपदश्च महारथः ॥ ४ ॥**

अत्र - यहाँ; शूराः - वीर; महा-इषु - आसा - महान धनुर्धर; भीम-अर्जुन - भीम तथा अर्जुन; समाः - के समान; युधि - युद्ध में; युयुधानः - युयुधान; विराटः - विराट; च - भी; द्रुपदः - द्रुपद; च - भी; महारथः – महान योद्धा।

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
**हिमसंस्कृतम् प्रकाशनम्**
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

## जम्मू-कश्मीरे प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे आतङ्कवादात् मुक्तिं प्रति अभूतपूर्व परिवर्तनम् अभवत्-केन्द्रीयगृहमन्त्री



भाजपेति दलस्य वरिष्ठः नेता तथा केन्द्रीयगृहमन्त्री अमितशाहः उक्तवान् यत् जम्मू-कश्मीरे प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे आतङ्कवादात् मुक्तिं प्रति अभूतपूर्व परिवर्तनम् अभवत्। पूंछ मण्डलस्य मेढरे एकां जनसभां सम्बोधयन् श्रीशाहः उक्तवान् यत् जम्मू-कश्मीरस्य यूनां हस्तेषु सम्प्रति पाषाणखण्डस्य स्थाने लैपटॉप इति संगणक यन्त्राणि सन्ति। श्रीशाहः आरोपितवान् यत् जम्मू-कश्मीरस्य लोकतन्त्रं त्रिभिः प्रभावशलिनः परिवारैः गृहितम् आसीत्। चतुर्दशोत्तर द्विसहस्र-तमे वर्षे श्रीमोदिनः सर्वकारस्य सत्ताप्राप्तेः अनन्तरमेव भूम्यस्तरे मार्गप्रशस्तमभवत् येन पञ्चायते, सम्भागे, मण्डलस्तरेषु च निर्वाचनानि सुनिश्चितानि। श्रीशाहः प्रतिपादितवान् यत् राष्ट्रिय-जनतान्त्रिक गठबन्धनस्य अथक प्रयासैः अद्य सहस्रशः कश्मीरी यूवानः स्वीय लोकतान्त्रिकाधिकाराणां प्रयोगं कुर्वन्तः विभिन्नस्तरीये निर्वाचने भागं भजन्ति।

# Forensic Units : हिमाचलस्य षट् जनपदेषु न्यायिक-एककानि अनुमोदितानि



हिमसंस्कृतवार्ताः - कार्यालयीयः प्रतिनिधिः। आपराधिक अन्वेषणे राष्ट्रियसुरक्षायां च न्यायिकविज्ञानस्य भूमिकां स्वीकुर्वन् प्रतिवर्षं २० सितम्बरदिनाङ्के विश्वन्यायिकविज्ञानदिवसः आचर्यते । अन्ताराष्ट्रीयन्यायविज्ञानसङ्घः १९५५ तमे वर्षे अस्य दिवसस्य स्थापनां कृतवान् । २०२४ तमस्य वर्षस्य सितम्बरमासस्य १५-२१ दिनाङ्कानां मध्ये राष्ट्रियन्यायिकविज्ञानसप्ताहः आचर्यते। अयं वार्षिकमहोत्सवः सम्पूर्णे विश्वे न्यायिकविज्ञानव्यावसायिकानां योगदानस्य स्वीकारार्थं सम्मानार्थं च आयोजितः अस्ति । हिमाचलप्रदेशस्य न्यायिकसेवानिदेशकः डॉ. मीनाक्षीमहाजन अवदत् यत् न्यायिकविज्ञानं आपराधिकन्यायव्यवस्थायाः महत्त्वपूर्णम् तत्त्वम् अस्ति। राज्यसर्वकारेण मन्त्रिमण्डलस्य गोष्ठ्यां हमीरपुरं, ऊना, सिरमौरं, कुल्लु, लाहौल-स्पीति, किन्नौरम् एतेषु जनपदेषु षट् जिल्लान्यायिक-एककानि अनुमोदितानि। एतदतिरिक्तं मन्त्रिमण्डले अपि पदद्वयं पूरयितुं सर्वकारेण अनुमोदनं कृतम् अस्ति । न्यायिकवैज्ञानिकाः अपराधस्थलानां अन्यस्थानानां च प्रमाणानां परीक्षणं विश्लेषणं च कृत्वा वस्तुनिष्ठनिष्कर्षान् निष्कासयन्ति ये अपराधिनां अन्वेषणं अभियोगं च कर्तुं साहाय्यं कर्तुं शक्नुवन्ति न्यायिकसेवानिदेशालयेन राष्ट्रियन्यायिकविज्ञानसप्ताहस्य २०२४ इत्यस्य अन्तर्गतं विविधाः कार्यक्रमाः अपि आयोजिताः। उत्सवस्य भागत्वेन २०२४ तमस्य वर्षस्य सितम्बर्-मासस्य १८, १९ दिनाङ्केषु SFSL Lab, Junga इत्यत्र अपराध-स्थल-प्रबन्धनस्य, एकरूप-अपराध-स्थल-रिपोर्टिङ्गस्य च विषये कार्यशालायाः आयोजनं कृतम् कार्यशालायां जुङ्गायाः एसएफएसएल-प्रयोगशाला, धर्मशालायाः आरएफएसएल एनआर, मण्डीनगरस्य आरएफएसएल सीआर, बिलासपुरश, नूरपुरं, बद्दी इत्येतेषां डीएफयू इत्येतयोः सर्वे राजपत्रिताधिकारिणः उपस्थिताः आसन्। २० सितम्बर २०२४ दिनाङ्के चण्डीगढमहाविद्यालयसमूहेन आयोजिते न्यायिकविज्ञानसप्ताहस्य कालखण्डे अपराधस्थलप्रबन्धनस्य साइबरसुरक्षायाः च विषये निदेशकः न्यायिकसेवाराज्यम् छात्राणां कृते व्याख्यानं दत्तवान् एतदतिरिक्तं यौन-उत्पीडनं, मादकद्रव्य-दुरुपयोगः, साइबर-सुरक्षा इत्यादिषु विषयेषु विद्यालय-महाविद्यालय-छात्राणां कृते विविधानि व्याख्यानानि प्रदत्तानि आसन्

# Rahul Gandhi : प्रियंका-सोनिया इत्येतयोः अनन्तरं राहु गान्धी अपि शिमलाम् आगतवान्



हिमसंस्कृतवार्ताः - शिमला । लोकसभायां विपक्षनेता तथा काङ्ग्रेसस्य पूर्वराष्ट्रीयाध्यक्षः राहुलगान्धी शनिवासरे शिमलानगरं प्राप्तवान्। राहुलगान्धी शिमलानगरम् आगमनमात्रेण सुरक्षासंस्थाः सजगाः अभवन् । काङ्ग्रेसस्य महासचिव प्रियङ्का गान्धी वाड्रा, दलस्य पूर्वाध्यक्षा सोनिया गान्धी च विगतदिनात् शिमला-नगरस्य समीपस्थ छराबड़ायां निवसन्ति। प्रियङ्का वाड्रायाः गृहं शिमलातः प्रायः १२ किलोमीटर् दूरे छराबड़ायाम् अस्ति । गान्धीपरिवारः प्रायः अवकाशदिनानि व्यतीतुं अत्र आगच्छति । १७ सेप्टेम्बर् दिनाङ्के सोनिया गान्धी चण्डीगढतः मार्गेण शिमलानगरं प्राप्तवती । पूर्वं प्रियङ्का गान्धी १५ सेप्टेम्बर् दिनाङ्के आगता आसीत् । सम्प्रति लोकसभायां विपक्षस्य नेता राहुल गांधी अपि शनिवासरे शिमलां प्राप्तवान्।

# केन्द्रीयसंस्कृतविश्वविद्यालयेन संचालितं संस्कृताध्ययनकेन्द्रम्



हिमसंस्कृतवार्ताः- जगदीश डाभी। केन्द्रीयसंस्कृतविश्वविद्यालयेन संचालितं संस्कृताध्ययनकेन्द्रं ए0 पी0 सेन मेमोरियल गर्ल्स पी0 जी0 कालेज, चारबाग, लखनऊ नगरे संस्कृतसम्भाषणशिबिरस्य उद्घाटनम् सितम्बरमासस्य एकादशदिनाङ्के जातम्। तथा समापनं सितम्बरमासस्य 21 दिनाङ्केऽभवत्। कार्यक्रमस्य संचालिका डॉ प्रियंका सिंहः आसीत्। अस्य कार्यक्रमस्य शुभारम्भः केन्द्रशिक्षिका डा.प्रियंका सिंहः द्वारा वैदिकं तथा लौकिकमंगलाचरणं प्रस्तुतं । सरस्वती वन्दना शोधच्छात्रा नन्दिनी गुप्ता कृतवती। स्वागतगीतं शोधच्छात्रा सञ्जना पटेल, गजाला एवं कोमल कश्यपः कृतवत्यः । मञ्चस्य शोभा लखनऊ जिला सेवायोजन अधिकारी प्रज्ञा त्रिपाठी, प्राचार्या रचना श्रीवास्तव तथा डॉ ऋचा मुक्ता महोदयाभिः कृता। स्वस्य सम्बोधने मुख्यातिथिः छात्रान् अवदत् यत् संस्कृतं पूर्वं वाच्यभाषा आसीत्, परं कालान्तरेण तस्याः क्षयः जातः, एतदर्थं पुनः वाच्यभाषारूपेण स्थापनस्य समयः आगतः। संस्कृतभाषा अस्माकं सभ्यतायाः परिचयं कारयति, अतः अस्माभिः सर्वैः मिलित्वा संस्कृतस्य एतां महान् परम्परां अग्रे सारणीयम्, यस्मिन् व्यासस्य, भासस्य, कालिदासस्य लेखनानि निरन्तरं प्रचलन्ति। अद्यत्वे अस्मिन् वैज्ञानिकयुगे प्राचीनभाषा संस्कृतं भाषाविशिष्टतायाः कारणात् अद्यापि प्रासंगिकम् अस्ति । बालकानां गृहे संस्कृतस्य तस्य जीवनोपयोगी श्लोकानां च महत्त्वम् उपदिष्टव्यम्। अहं प्रतिदिनं 'कराग्रे वसते लक्ष्मी कर मध्ये सरस्वती' इत्यादीनि स्वपुत्रीं पाठयामि। संस्कृताध्ययनकेन्द्रस्य एवं शिबिरस्य प्रस्ताविकं प्रियंका सिंहेन सरलतया उक्तम्। आनलाइन लिखित एवं मौखिक परीक्षायाः आधारेण प्रथम स्थानं डॉ दीपशिखा अवस्थी, नन्दिनी गुप्ता तथा द्वितीयस्थानं वैष्णवी एवं तृतीयस्थानं शानू पाठकः प्राप्तवत्यः । तथा अन्य सर्वासां प्रतिभागीनां कृते प्रमाणपत्र अपि महाविद्यालय पक्षतः दत्तम्। कार्यक्रमस्य समापनं शान्तिमन्त्रेण नैन्सी कृतवती। यदि अग्रेऽपि कोऽपि संस्कृतभाषा पठितुमिच्छन्ति तर्हि सर्टिफिकेट पाठ्यक्रमे प्रवेशं कर्तुं शक्नुवन्ति अधुना आवेदनं प्रचलति। प्रत्येकस्मिन् मासे दश दिवसीय संस्कृतसम्भाषणशिबिरं निःशुल्कसंचालनं हेतुः सम्पर्कं कर्तुं शक्नुवन्ति। सम्पर्क संख्या- 8737919003

# Water Tourism बिलासपुरस्य जलपर्यटनं वर्धयिष्यन्ति शक्तिपीठाः मातानयनदेवी-ज्वालाजी-बज्रेश्वरी-चामुण्डा-चिंतपूर्णी मन्दिरेषु अनुमत्यानन्तरं बृहद्फलकानि स्थापयिष्यन्ते



हिमसंस्कृतवार्ताः - बिलासपुरम्। बिलासपुरस्य जलपर्यटनस्य, साहसिकक्रीडायाः च प्रचारार्थं हिमाचलस्य प्रसिद्धानां शक्तिपीठानां शुभाशीर्वादः गृहीतः भविष्यति। जिलाबिलासपुर-प्रशासनेन जलपर्यटनस्य प्रचारार्थं धार्मिकपर्यटनेन सह संयोजयितुं च नूतनयोजनायाः कार्यम् आरब्धम्। शक्तिपीठेषु अनुमतिं प्राप्य जलपर्यटनं साहसिकक्रीडां च सम्बद्धानि बृहत्-फलकानि च स्थापितानि भविष्यन्ति। बिलासपुरस्य गोविन्दसागरसरोवरे कोलडैमजलाशये च आरभ्यमाणानां जलपर्यटनक्रियाकलापानाम् आकर्षणं कर्तुम् उद्देश्यं स्पष्टम् अस्ति। पर्यटकैः सह गोबिन्दसागरसरोवरे प्रचलन्ति जलक्रीडाक्रियाः शक्तिपीठं गच्छन्तः भक्ताः अपि आकर्षयिष्यन्ति। जिलाप्रशासनेन नूतना योजना निर्मिता अस्ति। राज्यस्य शक्तिपीठेषु बृहत्-फलक-माध्यमेन भक्तानां कृते जलक्रीडा-क्रियाकलापानाम् सूचनाः प्रदत्ताः भविष्यन्ति। योजनायाः अन्तर्गतं कुल्लूजनपदस्य मणिकर्ण-तीर्थस्थलम् अतिरिच्य श्री नयनदेवीमंदिरं, माँचिंतपूर्णी, माँ ज्वालाजी, श्रीबज्रेश्वरी, माँ चामुंडादेवी इत्यत्र च अस्य कार्ययोजना निर्मिता अस्ति, सा शीघ्रमेव अन्तिमरूपेण निर्धारिता भविष्यति। बिलासपुरस्य उपायुक्तः आबिद हुसैन सादिकः अवदत् यत् बिलासपुरमण्डले जलपर्यटनस्य प्रवर्धनार्थं शक्तिपीठेषु अनुमतिं प्राप्य बृहत् फलकानि स्थापितानि भविष्यन्ति, यस्य कार्ययोजना अन्तिमरूपेण निर्धारिता भवति।

## गोबिन्दसागर-सरोवरे शीघ्रमेव क्रूज-शिकारे-जलयानानि

बिलासपुरस्य उपायुक्तः आबिदहुसैनः सादिकः अवदत् यत् पर्यटनं तथा जलसाहसिक-क्रीडायाः क्रियाकलापेषु तीव्रतया कार्यं क्रियते। गोबिन्दसागरसरोवरस्य अनन्तरं कोलजलबन्धे अपि जलक्रीडायाः पर्यटनस्य च मार्गः स्वच्छः अस्ति । गोबिन्दसागर-सरोवरे शीघ्रमेव क्रूज-शिकारादिजलपर्यटन-कार्यक्रमाः आरभ्यन्ते । अक्टोबर्-मासस्य प्रथमपक्षे एव सरोवर-यात्राः आरभ्यन्ते । तस्य औपचारिकं उद्घाटनं मुख्यमंत्रिणः करकमलाभ्यां भविष्यति। तदतिरिक्तं कोलबन्ध-जलाशयस्य जलपर्यटन-क्रियाकलापानाम् कृते सर्वकाराद् हरितसंकेतः अपि प्राप्तः अस्ति । एतादृशे सति आगामिसमये मण्डले पर्यटनस्य आकर्षणं वर्धते।

# संस्कृतविद्यास्थानानि—१९

## ब्राह्मणानां भाषाशैलीवैशिष्ट्यानि–

१) यदा मन्त्रार्थः दुरूहः जातः तदा ऋषिभिः तस्य स्पष्टीकरणार्थं यज्ञविधीनां प्रतिपादनार्थं च ब्राह्मणानि प्रणीतानि। अतः संहिताभागः दैवतस्तुतिप्रधानः ब्राह्मणानि विधिप्रधानानि च सन्ति।

२) ब्राह्मणेषु वैदिकस्य लौकिकस्य च संस्कृतेः सम्मिश्रणं दृश्यते। ब्राह्मणानां भाषा अपि वैदिकलौकिकशब्दैः मिश्रिता अस्ति। अतः एषा भाषा वैदिकं तथा लौकिकं संस्कृतं अथवा वैदिकी तथा लौकिकी संस्कृतिः अनयोः मध्ये सेतुवत् कार्यं करोति। एषा भाषा सरला, नैसर्गिकी , उपमारूपकप्रचुरा, दीर्घसमासरहिता, सुबोधा, कथाख्यानादिभिः रुचिकरैः अंशैः पूर्णा च वर्तते।

## ब्राह्मणानां देशकालौ–

एतेषु ग्रन्थेषु ये स्थलादीनाम् उल्लेखाः प्राप्यन्ते तदनुसारं कुरुपञ्चालदेशः तथा च सरस्वतीनद्याः समीपवर्तिप्रदेशः ब्राह्मणग्रन्थानां रचनास्थानम् इति प्रतीयते। विशेषतः ताण्ड्यमहाब्राह्मणस्य सम्बन्धः सरस्वतीनद्या सह विशेषत्वेन वर्तते। सरस्वती यत्र विलुप्ता तस्य स्थानस्य नाम विनशनम् इति तथा च तस्याः पुनरुद्गमस्य नाम प्लक्षप्रस्रवणम् इति अस्ति। मनुस्मृतौ सरस्वती दृषद्वती च अनयोः मध्यवर्तिप्रदेशः ब्रह्मावर्तनाम्ना निर्दिष्टः अस्ति। अस्मिन्प्रदेशे उत्पन्नानां विप्राणाम् आचारः जगति सर्वमानवानां कृते आदर्शभूतः इति मनुमतम्। मुख्यत्वे अस्मिन्नेव प्रदेशे ब्राह्मणानां रचनं जातम्।



२) विण्टरनिट्स् ब्राह्मणानां कालः इस पूर्वं ११०० इति अस्तीति ऊहितवान्। तथापि शतपथब्राह्मणे एकत्र 'कृत्तिका पूर्वस्यां दिशि उदेति ततश्च तस्मात् स्थानात् न प्रच्यवते' एतादृशः उल्लेखः प्राप्यते। एषा स्थितिः इसवीयात् त्रिसहस्रवर्षपूर्वम् आसीदिति ज्योतिर्गणितेन शंकरदीक्षितमहोदयेन निश्चितम्। ततः पूर्वमेव शतपथस्य रचनाकालः भवितुम् अर्हति।

एतेन सामान्यतया इसवीयात् पूर्वं त्रिसहस्रवर्षेभ्यः इसवीयात् पूर्वं द्विसहस्रवर्षपर्यन्तं ब्राह्मणानां रचनाकालः इति वक्तुं शक्यते।

*श्री. अभिजित् तोडकरः*
*abhitdkr9@gmail.com*

# उच्चशिक्षायाः कृते नवीनशिक्षानीतौ समाविष्टानां तकनीकी- नैतिकमूल्यानां निरन्तरप्रशिक्षणम् आवश्यकम् अस्ति- प्रो. इन्दुपाण्डेयखण्डूरी



हिमसंस्कृतवार्ताः- कुलदीपमैन्दोला, श्रीनगरम्

विश्वविद्यालयानुदानायोगान्तर्गते मालवीयमिशन- शिक्षकप्रशिक्षणकेन्द्रे, हेमवतीनन्दन- बहुगुणागढ़वाल- विश्वविद्यालय- श्रीनगरगढ़वाले, उत्तराखण्डे देशस्य उच्चशिक्षासंस्थानेषु सेवारतशिक्षकाणां प्रशिक्षणार्थं 'एन. आई. टी.' इत्यनेन 21 अगस्ततः 19 सितम्बर 2024 दिनांकं यावत्, अन्तर्जालमाध्यमेन गुरुदक्षता- संकायप्रेरणकार्यक्रमः समायोजितः आसीत्। यस्य समापनं शुक्रवासरे सञ्जातम्। अस्मिन् देशस्य विभिन्नेषु उच्चशिक्षासंस्थासु सेवारताः (उत्तराखण्डम्, उत्तरप्रदेशः, दिल्ली, बिहारम्, उड़ीसा, राजस्थानं, झारखण्डः च) इत्यादीनाम् आहत्य ७ राज्यानां शिक्षकप्रतिभागिनः प्रशिक्षणं प्राप्तवन्तः। मालवीयकेन्द्रद्वारा आयोजितेऽस्मिन् गुरुदक्षता कार्यक्रमस्य समापनसत्रस्य मुख्यातिथिः प्रो. एन. एस. पंवारः विश्वविद्यालयकुलसचिवः कौशलयुक्तान्, कुशलप्रबन्धनान् च संस्थानां कृते सम्पत्तिरूपेण मन्यते स्म। सः अवदत् यत् मालवीयमिशनशिक्षकप्रशिक्षणकेन्द्रात् देशस्य सर्वेभ्यः शिक्षकेभ्यः प्रशिक्षणं क्रियते इति महान् सुखस्य विषयः। सः अवदत् यत् यथा गुरुकुलेषु व्यक्तित्वस्य सर्वेऽपि पक्षाः प्रवर्धिताः, तथैव मालवीयकेन्द्रेण शिक्षकाणां व्यक्तित्वं परिष्कृतं भवति।

कार्यक्रमे मालवीयमिशनशिक्षकप्रशिक्षणकेन्द्रस्य निदेशिका प्रो. इन्दुपाण्डेयखण्डूरी कार्यक्रमस्य मुख्योद्देश्यं प्रकाशितवती गुरुदक्षतादिकार्यक्रमाः उच्चशिक्षायाः प्रशिक्षणार्थं उपयोगिनो भवन्ति इति सा अवदत्। सुखस्य परमकल्याणस्य च अनुसरणं कुर्वन् शिक्षकस्य नैतिकमूल्यानि, भावनात्मकबुद्धिः, अनुसन्धानं, नेतृत्वं, समीक्षात्मकचिन्तनं, सामाजिककल्याणं, ए.आइ. इति, प्रौद्योगिकी इत्यादीनां च एकीकरणस्य आवश्यकता वर्तते। सा अवदत् यत् प्रारम्भिकपञ्जीकरणार्थं १७७ आवेदनपत्राणि प्राप्तानि, येषु ५४ शिक्षकाः कार्यक्रमे भागं ग्रहीतुं आरब्धवन्तः, ४७ शिक्षकाः प्रशिक्षणं सम्पन्नवन्तः। एकमासपर्यन्तं आयोजिते अस्मिन् सम्पूर्णे कार्यक्रमे २६ कार्यदिनेषु सार्धघण्टायाः १०४ तकनीकीसत्रेषु आयोजनं कृतम्। हिमाचलप्रदेशः, दिल्ली, पंजाबः, राजस्थानं, उत्तरप्रदेशः, उत्तराखण्डं, अरुणाचल प्रदेशः, असमः, हरियाणा, महाराष्ट्रः इत्यादिभ्यः प्रतिष्ठितोच्चशिक्षणसंस्थानेभ्यः समागताः प्रतिभागिनः 40 प्रशिक्षकैः प्रशिक्षिताः अभवन्। कार्यक्रमस्य विभिन्नेषु तकनीकिसत्रेषु कौशलविकासः अखण्डताविषये, अकादम्यां नैतिकमनः, न्यूरोलिंग्वस्टिकप्रोग्रामिंग इति, 21तमायाः शताब्द्याः शिक्षिकासु भविष्यवादीकौशलस्य निर्धारणं, एन. ई. पी. इति, शैक्षणिकनेतृत्वम्, उच्चशिक्षापारिस्थितिकीतन्त्रं, अनुसन्धानं विकासं च, संकायप्रवर्धनम्, अवकाशं, आ. ई. सी. च इत्यादिमहत्त्वपूर्णविषयान् मनसि कृत्वा शिक्षकप्रतिभागिभ्यः प्रशिक्षणं प्रदत्तम्। तकनीकीसत्रस्य अतिरिक्तं सूक्ष्मशिक्षणं, परियोजनाप्रस्तावलेखनं, समूहचर्चा, एमसीक्यू इत्यादीनि अपि शिक्षकाणां प्रशिक्षणार्थं कार्यक्रमस्य भागाः आसन्। अस्मिन् कार्यक्रमे मालवीयकेन्द्रस्य सहनिदेशकः डॉ. सोमेशः थपलियालः सर्वेषां स्वागतं संचालनं च कृतवान्। केन्द्रस्य सहनिदेशकः डॉ. राहुलकुंवरसिंहः कार्यक्रमस्य रूपरेखां वदन् सर्वेभ्यः धन्यवादं दत्तवान्। कार्यक्रमस्य कार्यकारिणीतः डॉ. अनुरागगोयलः कार्यक्रमस्य आयोजने सहायतां कृतवान्। पूनम रावतः, अनिल कठैतः च सहकार्यं कृतवन्तौ।

# भारतीय आहारः

## १२ मासान् यावत् अनुसरणीयम्

चैत्र (मार्च-एप्रिल) – अस्मिन् मासे चणकानां सेवनं कुर्वन्तु यतः चणकाः भवतः रक्तसञ्चारं सुदृढं करोति तथा च रक्तं शुद्धं करोति तथा च अनेकेभ्यः रोगेभ्यः अपि रक्षणं करोति। चैत्रमासे नीमस्य ४-५ मृदुपत्राणि अपि प्रतिदिनं प्रयोक्तव्यानि, अनेन सह अस्य मासस्य सर्वान् दोषान् परिहर्तुं शक्नुमः । नीमपत्रचर्वणेन शरीरे विद्यमानाः दोषाः दूरीकृताः भवन्ति ।

वैशाख (अप्रिल – मे) – वैशाखमासे ग्रीष्मकालस्य आरम्भः भवति । अस्मिन् मासे बिल्वपत्रस्य उपयोगः अवश्यं करणीयः यत् भवन्तं स्वस्थं करिष्यति। वैशाखमासे तैलस्य प्रयोगं सर्वथा न कुर्वन्तु यतः एतेन भवतः शरीरं अस्वस्थं भवितुम् अर्हति ।

ज्येष्ठ (मे-जून) – भारते अयं मासः सर्वाधिकं उष्णः अस्ति । ज्येष्ठमासे अपराह्णे निद्रा स्वास्थ्याय हितकरं भवति, शीतलं घृतं, लस्सी, रसं, यथाशक्ति जलं च सेवनं कुर्वन्तु। गुरुभोजनं, उष्णं च न सेवयेत् । तेषां प्रयोगात् भवतः शरीरं रोगैः पीडितं भवेत् ।

आषाढ (जून-जुलाई) – आषाढमासे, वृद्धगोधूम, सत्तू, यव, तण्डुल, क्षीर, शीतभोजन , कटु, बथुआ इत्यादीनां प्रयोगः करणीयः तथा आषाढमासे अपि वस्तुनां प्रयोगः करणीयः उष्ण प्रकृतिः एवम् करणं भवतः स्वास्थ्याय हानिकारकं भवितुम् अर्हति।

श्रावण (जुलाई-अगस्त) – श्रावणमासे हरितशाकानि त्यक्त्वा क्षीरस्य उपयोगः अपि न्यूनीकरोतु। अन्नस्य मात्रां न्यूनीकरोतु – पुरातनतण्डुलं, पुरातनगोधूमं, खिचडी, दधिं, लघुपच्यभोजनं च स्वीकरोतु।

भद्रपद (अगस्त-सितम्बर) – अस्मिन् मासे लघुसुलभपच्यभोजनस्य सेवनं कुर्वन्तु वर्षाऋतुकारणात् भवतः पाचनवह्निः अपि मन्दः भवति, अतः सुलभपच्यभोजनं खादन्तु।

अश्विन (सितम्बर-अक्टोबर) – अस्मिन् मासे दुग्धं, घृतं, गुडं, नारिकेलं, शुष्कं द्राक्षाफलं, इत्यादीनां सेवनं कर्तुं शक्यते । एतत् गुरुभोजनं किन्तु अद्यापि अस्मिन् मासे पच्यते यतोहि अस्मिन् मासे अस्माकं पाचनवह्निः प्रबलः भवति।



sudha_sathaye@yahoo.com

कार्तिक (अक्टोबर-नवम्बर) – कार्तिकमासे उष्णं दुग्धं, गुड़ं, घृतं, शर्करा, मूली इत्यादीनां प्रयोगः करणीयः । शीतपेयस्य प्रयोगं त्यजन्तु। छाछ, लस्सी, शीतदधि, शीतफलरस इत्यादीनां सेवनं न कुर्वन्तु, एते भवतः स्वास्थ्यस्य हानिं कर्तुं शक्नुवन्ति।

मार्गशीर्ष (नवम्बर-दिसम्बर) – अस्मिन् मासे शीतानां वा अत्यन्तं उष्णवस्तूनाम् उपयोगं न कुर्वन्तु।

पौष (दिसम्बर-जनवरी) – अस्मिन् ऋतौ दुग्धं, खोया, , लड्डू, गुड़, तिल, घृत, आलू, आम्ला इत्यादिभ्यः निर्मिताः उत्पादाः उपयुज्यताम्, एतानि वस्तूनि भवतः शरीरस्य स्वास्थ्यं दास्यन्ति। शीतभोजनं कटुशुष्कं च न प्रयोक्तव्यम् ।

माघा (जनवरी-फरवरी) – अस्मिन् मासे अपि भवन्तः उष्णं गुरुं च भोजनं सेवितुं शक्नुवन्ति । घृतं, नवधान्यं, लड्डू इत्यादयः प्रयोक्तुं शक्यन्ते ।

फाल्गुन (फरवरी-मार्च) – अस्मिन् मासे गुडस्य प्रयोगः करणीयः । प्रातःकाले योगस्य स्नानस्य च दिनचर्याम् कुर्वन्तु।

संकलितम् अनुवादितम् सुधा साठ्ये मुंबई।

हिमसंस्कृतवार्तायै सहयोगं कुर्वन्तु
हिमसंस्कृतवार्ताः
संस्कृतकार्यमिदम् पुण्यकार्यमिदम्
इदं संस्कृताय न मम